।। শিৱস্তুতিঃ ।।

স্ফুটং স্ফটিকসপ্রভং স্ফুটিতহাটকশ্রীজটং
শশাংকদলশেখৰং কপিলফুল্লনেত্রত্রয়ম ।
তৰক্ষুৱৰকৃত্তিমদ্ভুজগভূষণং ভূতিমত
কদা নু শিতিকংঠ তে ৱপুৰৱেক্ষতে ৱীক্ষণম ।। ১ ।।
ত্রিলোচন ৱিলোচনে লসতি তে ললামায়িতে
স্মৰো নিয়মঘস্মৰো নিয়মিনামভূদ্ভস্মসাত ।
স্ৱভক্তিলতয়া ৱশীকৃতৱতী সতীয়ং সতি
স্ৱভক্তৱশগো ভৱানপি ৱশী প্রসীদ প্রভো ।। ২ ।।
মহেশ মহিতোঽসি তত্পুৰুষ পূৰুষাগ্ৰ্যো ভৱার্স
নঘোৰ ৰিপুঘোৰ তেঽনৱম ৱামদেৱাংচলিঃ ।
নমঃ সপদিজাত তে ত্ৱমিতি পংচৰূপোঽংচিতঃ
প্রপংচয় চ পংচৱৃন্মম মনস্তমস্তাড্য় ।। ৩ ।।
ৰসাঘনৰসানলানিলৱিয়দ্বিৱস্ৱদ্বিধু স
প্রয়ষ্টৃষু নিৱিষ্টমিত্যজ ভজাআমি মূর্ত্যষ্টকম ।
প্রশাংতমুত ভীষণং ভুৱনমোহনং চেত্যহো
ৱপূংষি গুণপুংষি তেঽহমহমাত্মনোঽহংভিদে ।। ৪ ।।
ৱিমুক্তিপৰমাধ্ৱনাং তৱ ষডধ্ৱনামাস্পদং
পদং নিগমৱেদিনো জগতি ৱামদেৱাদয়ঃ ।
কথংচিদুপশিক্ষিতা ভগৱতৈৱ সংৱিদ্রতে
ৱয়ং তু ৱিৰলাংতৰাঃ কথমুমেশ তন্মন্মহে ।। ৫ ।।
কঠোৰতকুঠাৰয়া ললিতশূলয়া বাহয়া
ৰণড্ঢমৰয়াঅ স্ফুৰদ্ধৰিণয়া সখট্ৱাংগয়া ।
চলাভিৰচলাভিৰপ্যগণিতাভিৰুন্নৃত্যত স

শ্চতুৰ্দশা জগংতি তে জয় জয়েত্য়য়ুৰ্ৱিস্ময়ম ।। ৬ ।।
পুৰত্রিপুৰৰংধনং ৱিৱিধদৈত্য়ৱিধ্বংসনং
পৰাক্রমপৰংপৰা অপি পৰা ন তে ৱিস্ময়ঃ ।
অমৰ্ষবলহৰ্ষিতক্ষুভিতৱৃত্তনেত্রয়ো স
জ্জ্বলজ্ৱলন হেলয়া শলভিতং হি লোকত্রয়ম ।। ৭ ।।
সহস্রনয়নো গুহঃ সহসহস্ৰৰশ্মিৰ্ৱিধু স
ৰ্বৃহস্পতিৰুতাপ্পতিঃ সসুৰসিদ্ধৱিধ্য়াধৰাঃ ।
ভৱত্পদপৰায়ণাঃ শ্ৰীয়মিমামগুঃ প্ৰাৰ্থিনাং
ভৱান সুৰতৰুৰ্দৃশং দিশ শিৱাং শিৱাৱল্লভ ।। ৮ ।।
তৱ প্রিয়তমাদতিপ্রিয়তমং সদৈৱাংতৰং
পয়স্যুপহিতং ঘৃতং স্ৱয়মিৱ শ্রিয়ো ৱল্লভম ।
ৱিভিধ্য় লঘুবুদ্ধয়ঃ স্ৱপৰপক্ষলক্ষায়িতং
পঠংতি হি লুঠংতি তে শঠহৃদঃ শুচা শুংঠিতাঃ ।। ৯ ।।
নিৱাসনিলয়শ্চিতা তৱ শিৰস্ততিৰ্মালিকা
কপালমপি তে কৰে ত্ৱমশিৱোঽস্য়নংতৰ্ধিয়াম ।
তথাঽপি ভৱতঃ পদং শিৱ শিৱেত্য়দো জল্পতাস
মকিংচন ন কিংচন ৱৃজিনমস্ত্য়ভস্মীভৱত ।। ১০ ।।
ত্ৱমেৱ কিল কামধক সকলকামমাপূৰয়ন
অপি ত্রিনয়নঃ সদা ৱহসি চাত্রিনেত্রোদ্ভৱম ।
ৱিষং ৱিষধৰান দধত পিবসি তেন চানংদৱান
ৱিৰুদ্ধচৰিতোচিতা জগদধীশ তে ভিক্ষুতা ।। ১১ ।।
নমঃ শিৱ শিৱাশিৱাশিৱ শিৱাৰ্ধ কৃংতাশিৱং
নমো হৰ হৰ হৰাহৰহৰাংতৰীং মে দৃশম ।
নমো ভৱ ভৱাভৱ প্ৰভৱ ভূতয়ে সংপদাং
নমো মৃড নমো নমো নম উমেশ তুভ্য়ং নমঃ ।। ১২ ।।

সতাং শ্ৰৱণপদ্ধতিং সৰতু সত্ৰতোক্তেত্যসৌ
শিৱস্য় কৰুণংকুৰাত প্ৰতিকৃতাত সদা সোদিতা ।
ইতি প্ৰথিতমানসো ৱয়ধিত নাম নাৰায়ণঃ
শিৱস্তুতিমিমাং শিৱাং লিকুচসূৰিসূনুঃ সুধীঃ ।। ১৩ ।।
।। শ্ৰী (লিকুচ) নাৰায়ণপংডিতাচাৰ্য়ৱিৰচিতা শিৱস্তুতিঃ ।।
।। ভাৰতীৰমণমুখ্য়প্ৰাণাংতৰ্গত শ্ৰীকৃষ্ণাৰ্পণমস্তু ।।

www.yousigma.com